-३।८ संस्कृत

स्तोत्र

# गजेंद्रमोक्ष

५९८ | श्लो २८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशायनमः॥शतानिकउवाच॥मयाहिदेवदेवस्यविष्णो
रमिततेजसः॥श्रुत्वाविभूतयःसर्वागदतस्तवसुव्रत॥१॥
यदिप्रसंनोभगवाननुग्राह्योस्मिवायदि॥तदहंश्रोतुमिछा
मिनृणांदुःस्वप्ननाशनं॥२॥स्वप्नादिषुमहाभागदृश्यंतेयाःशु
भाःशुभाः॥फलानिचप्रयछंतितद्गुणान्यवभार्गव॥३॥ताह
कुपुण्यपवित्रंचनृणामतिशुभप्रदं॥दुःस्वप्नोपशमनंतन्मे
विस्तरतोवह॥४॥शौनकउवाच॥इदमेवमहाभागपृष्टवांश्च

the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

(2)

ग० पितामहः॥भीष्मंधर्मभृतांश्रेष्ठंधर्मपुत्रोयुधिष्ठिरः॥५॥ मो०
१३८ अर्घ्यंपुरुषमीशानंपुरुहूतंपुरातनं॥ऋतमेकाक्षरंब्रह्मव्य
क्ताव्यक्तंसनातनं॥६॥अस[illegible]च्चयद्विश्वंनित्यंसदसतःपरं
परंपराणापरमंपुराणंपर[illegible]॥७॥मांगल्यमंगलंविष्णुं १३४
वरण्यंमनघंशुचिं॥नमस्कृत्यहृषीकेशंचराचरगुरुंहरिं॥८
प्रवक्ष्यामिमतंपुण्यंकृष्णद्वैपायनस्यच॥येनोक्तेनश्रुतेनापि
नश्यंतेसर्वपातकं॥९॥नारायणसमोदेवोनभूतोनभविष्यति

(2A)

एतेनसत्यवाक्येनसर्वार्थानूसाधयाम्यहं ॥१०॥ किंतस्यबहुभि
र्मंत्रैः किंतस्यबहुभिर्व्रतैः ॥ नमोनारायणायेतिमंत्रःसर्वार्थ
साधकः ॥११॥ यज्ञेबहुसंपरमत्युदारंयंदीपमध्येसुतमात्म
वंतं ॥ पराशराद्गंधवतीमहर्षिस्तस्मैनमोज्ञानतमोनुदाय
१२ ॥ नमोभगवतेतस्मैव्यासायामिततेजसे ॥ यस्यप्रसादाद्व
क्ष्यामिनारायणकथामिमां ॥१३॥ वैशंपायनमासीनंपुरा
णोक्तिविचक्षणं ॥ इममर्थंसराजर्षिः पृष्टवानूजनमेजयः ॥१४

ग्र० जनमेजयउवाच॥किंजपन्मुच्यतेपापात्किंजपन्सुखमश्नुते मो०
१३५ दुःस्वप्ननाशनेपुण्यंश्रोतुमिच्छामिमानद॥३५॥वैशंपायन
उवाच॥एवमेवपुराप्रश्नंपृष्टवांस्तेपितामहः॥भीष्मवैव्रती
नांश्रेष्ठंतच्चाहंकथयामिते॥३६॥देवव्रतंमहाप्राज्ञंसर्वशास्त्र १३५
विशारदं॥विनयेनोपसंगम्यपर्यपृच्छद्युधिष्ठिरः॥३७॥युधि
ष्ठिरउवाच॥दुःस्वप्नदर्शनेघोरंमवक्ष्यभरतर्षभ॥प्रयतःकिंज
पञ्जाप्यंविबुधःकिमनुस्मरेत॥३८॥यःकुर्यान्नमस्कारंप्रात

(3A)

रुत्थायमानवः॥ किंचध्यायेच्चसततंकिंजप्यो वा भवेत्सदा १९
पितामहप्रसादेनबुद्धिभेदोभवेन्मम॥ तदहंश्रोतुमिच्छा
मिब्रूहिनोवदतांवर॥२०॥भीष्मउवाच॥ शृणुराजन्महाबाहो
कथयिष्येहिज्ञांतिकं॥ दुःस्वप्नदर्शनंप्राप्ययज्ञानित्यंसमाहितः
२१॥ अत्राप्युदाहरंतीममितिहासंपुरातनं॥ गजेंद्रमोक्षणंपु
ण्यंकृष्णस्याक्लिष्टकर्मणः॥२२॥ सर्वरत्नमयःश्रीमान्त्रिकूटो
नामपर्वतः॥ सुतःपर्वतराजस्यसुमेरोर्भास्करद्युतेः॥२३॥

(५)

गु० क्षिरोदजलविक्षुब्धैर्धौतामलशिलातलः ॥ उत्थितः सागरं मो०
१३६ भीत्वा देवर्षिगणसेवितः ॥ २४ ॥ अप्सरोभिः परिवृतः श्रीमत्प्र
श्रवणाकुलः ॥ गंधर्वैः किंनरैर्यक्षैः सिध्दचारणपन्नगैः ॥ २५
मृगैः सिंहैर्गजेंद्रैश्च वृतो नगोत्तमो विराजते ॥ पुन्नागैः कर्णिका १३६
रैश्च सुबिल्वैर्दिव्यपाटलैः ॥ २६ ॥ चूतनिंबकदंबैश्च चंदनागरु
चंपकैः ॥ शालैस्तालैस्तमालैश्च तरुभिश्चार्जुनैस्तथा ॥ २७ ॥
बकुलैः कुंदपुष्पैश्च सरलैर्दिव्यदारुभिः ॥ मंदारकुसुमैश्चान्यै

Joint project of the Rajwade Sanshodhak Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

पारिजातैश्च सर्वज्ञाः ॥२८॥ एवं बहुविधावृक्षैः सर्वतः समलं
कृतः ॥ नानाधात्वंकितैः शृंगैः प्रस्रवद्भिः समंततः ॥२९॥ शो
भितारुचिरप्रख्यैस्त्रिभिर्विस्तीर्णसानुभिः ॥ मृगेंद्रारवसृगैः
सिंहैर्मातंगैश्च सरामदैः ॥३०॥ जीवजीवकसंघुष्टैश्चकोरद्वि
खिनादितं ॥ तस्यैकं कांचनं शृंगं सेव्यते यदिवाकरः ॥३१॥
नानापुष्पसमाकीर्णं नानागंधसमाकुलं ॥ द्वितीयं राजतं शृं
गं सेव्यते य निशाकरः ॥३२॥ पांडुरांबुदसंकाशं तुषारचयसंनिभं

ग० वज्रेंद्रनीलवैडुर्यतेजोभिर्भासयंनभः ॥३३॥ तलीयंब्रह्म मो०
१३८ सदनंप्रहृष्टंश्रृंगमुत्तमं ॥ पद्मरागसमप्रख्यं तारागण
समन्वितं ॥३४॥ नैतल्लभ्याः पश्यंतिनष्टात्मानोननास्तिकाः
नावमतपसोलोकेयच्चपापकृतोजनाः ॥३५॥ नानाराधि १३८
तगोविंदाश्चैलंपश्यंतिमानवाः ॥ तस्यसानुमतः श्रेष्ठंसरः
कांचनपंकजं ॥३६॥ कारंडवसमाकीर्णंराजहंसोपशोभि
तं ॥ मत्तभ्रमरसंघुष्टंचकोरद्विरिविनादितं ॥३७॥ कमलोत्पल

(5A)

कल्हारः पुंडरीकोपद्मशोभितं ॥ कुमुदैः शतपत्रैश्च कांचनैः
समलंकृतं ॥ ३८ ॥ पद्मैर्मरकतप्रख्यैः पुष्पैः कांचनसंनिभैः
गुल्मैः कीचकवेणूनां समंतात्परिवारितं ॥ ३९ ॥ अत्यद्भुतं महा
स्थानं विचित्रशिखराकुलं ॥ शतयोजनविस्तीर्णं दशायोजन
मायतं ॥ ४० ॥ पंचयोजनमूर्ध्वानं सर एतत्प्रमाणतः ॥ हिमखं
डोदकं राजन् सुस्वादममृतोपमं ॥ ४१ ॥ त्रैलोक्ये दृष्टपूर्वं च यत्तत्स
रसमुत्तमं ॥ सुप्रसन्नं सरो दिव्यं देवानामपि दुर्लभं ॥ ४२ ॥ खो

(6)

ग० तेन द्विगुणं प्रोक्तं ग्रारचैोरिव निर्मलं ॥ उपहाराय देवानां रसि मो०
१३८ धाववर्जितपंकजं ॥४३॥ तस्मिन् सरसि दुष्टात्मा विरोपोंतर्जला
श्रयः ॥ आसीद्ग्राहो गजेंद्राणां दुराधर्षो महाबलः ॥४४॥ अथ
दंतोज्वलमुखः कदाचिद्गजयूथपः ॥ आजगाम तृषाक्रांतः १३८
करेणूपरिवारितः ॥४५॥ मरुभावीजलाकांक्षी पादचारीव प
र्वतः ॥ वासयन्मदगंधेन गजानैरावतोपमान् ॥४६॥ गजस्त्वं
जनसंकाशो मदाच्चलितलोचनः ॥ तृषितः पानकामोयं मव

Joint property of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6A)

र्णश्चतत्सरः॥४७॥पिबतस्तस्यतत्तोयंग्राहश्चसमपद्यते
सुलीनःपंकजवनेयूथमध्यगतःकरी॥४८॥गृहीतस्तेनरौ
द्रेणग्राहेणातिबलीयसा॥पश्यंतीनांकरेणूनांक्रोशंती
नांसुदारुणं॥४९॥नीयतेपंकजवनेग्राहेणाव्यक्तमूर्त्तिना
गजोप्याकर्षतेतीरंग्राहश्चाकर्षतेजलं॥५०॥तयोर्युद्धम
हाघोरंदिव्यंवर्षसहस्रकं॥वारुणैःसंयुतःपाशैर्निष्प्रयत्न
गतिःकृतः॥५१॥वेष्ट्यमानःसघोरैस्तुपाशैर्नागोदृढस्तथा॥

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai.

(७)

गजें० विस्फूर्जितमहाशक्तिः विक्रोशंश्च महारवान् ॥५२॥ व्यथि मो०
१३१ तः सन्निरुत्साहो गृहीतो घोरकर्मणा ॥ परमापदमापन्नो
मनसाचिंतयद्धरिं ॥५३॥ स तु नागवरः श्रीमान्नारायणप
रायणः ॥ तमेव शरणं देवं गतः सर्वात्मना तदा ॥५४॥ एकाग्रोनि १३१
गृहीतात्मा विशुद्धेनांतरात्मना ॥ नैकजन्मांतराभ्यासात्
भक्तिमान्गरुडध्वजः ॥५५॥ नान्यं देवं महादेवात्पूजयामा
स केशवात् ॥ दिग्बाहुं सर्गमूर्द्धानं भूपादं गगनोदरं ॥५६॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

6A)

आदित्यचंद्रनयननमनेतोविश्वतोमुखं ॥ भूतात्मानंच मे
घाभंत्रीरवच्चक्रगदाधरं ॥ ५७ ॥ सहस्रशुभनागानिमादिदे
वमजं विभुं ॥ संशृत्यपुष्करंकांचनंकमलोत्तमं ॥ ५८
निवेद्यमनसाध्यात्वापूजांकृत्वाजनार्दने ॥ आपद्विमोक्षा
यदिछनूगजस्तोत्रंमुदीरयेत् ॥ ५९ ॥ गजेंद्रउवाच ॐनमो
मूलप्रकृतये अजितायमहात्मने ॥ अनाश्रितायदेवाय
निस्पृहायनमोनमः ॥ ६० ॥ नमआद्यायबीजायआर्षेयाय

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(४)

गी० प्रवर्त्तिने॥अनंतायचनैकायअव्यक्तायनमोनमः॥६१॥ गो०
१८० नमोगुह्यायगूढायगुणायगुणधर्मिणे अतर्क्यायाप्रमे
यायअतुलायनमोनमः॥६२॥नमःशिवायशांतायनिष्क्र
यायययज्ञाद्विने॥सनातनायपूर्वायपुराणायनमोनमः॥६३ १८०
नमोजगत्प्रतिष्ठायगोविंदायनमोनमः॥नमोदेवाधिदेवाय
स्वभावायनमोनमः॥६४॥नमोस्तुपद्मनाभायसांख्ययो
गोद्भवायच॥विश्वेश्वरायदेवायशिवायहरयेनमः॥६५॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8 A)

नमोस्तुतस्मैदेवायनिर्गुणायगुणात्मने॥नारायणायदेवाय
देवानांपतयेनमः॥६६॥नमोनमःकारणवामनायनाराय
णायामितविक्रमाय॥श्रीशार्ङ्ग॰चक्रासिगदाधरायनमो
स्तुतस्मैपुरुषोत्तमाय॥६७॥गुह्यायवेदनिलयायमहोदरा
यसिंहायदैत्यनिधनायचतुर्भुजाय॥ब्रह्मेंद्ररुद्रमुनिचार
णसंस्तुतायदेवोत्तमायवरदायनमोच्युताय॥६८॥नागेंद्र
भोगशयनायनाशानसुप्रियायगोक्षीरहेमशुकनीलघनोपमाय

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

गजें॰ पीतांबरायमधुकैटभनाशनायविश्वायचारुमुकुटाय मो॰
१७ नमोक्षराय॥६९॥नाभिप्रजातकमलासनसंस्तुतायक्षीरो
दकार्णवनिकेतपयोधराय॥नानाविचित्रमुकुटांगदभूष
णाययोगेश्वरायवरदायनमोवराय॥७०॥भक्तिप्रियायवर १७
दीप्तसुदर्शनायफुल्लारविंदविपुलायतलोचनाय॥देवेंद्र
विघ्नशमनोद्यतपौरुषाययोगेश्वरायवरदायनमोवराय
७१॥नारायणायनरलोकपरायणायकालायकालकम

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

लायतलोचनाय॥ रामायरावणविनाशकृतोद्यमाय धीरा
यधीरतिलकायतलोचनाय॥ ७२॥ पद्मासनायमणिकुंडल
भूषणायकंसांतकायभुभूपालविनाशनाय॥ गोवर्धनाय
सुरेशात्रुनिकृंदनायदामोदरायवरदायनमोवराय॥ ७३॥
अल्लायनाथत्रिदशायनायलोकैकनाशनायहितात्मनाय
नारायणायार्तिविनाशनायमहावराहायनमस्करोमि॥ ७४
कूटस्थमव्यक्तमचिंत्यरूपंनारायणंकारणमादिदेवं॥ युगांत

(१०)

ग० ऋाषंपुरुषंपुराणंतंवासुदेवंशरणंप्रपद्ये॥७५॥अहं त्वयम मो०
१८ छदनंतमव्ययंमहर्षयोब्रह्ममयंसनातनं॥वदंतियंवैपुरु
षंपुरातनंतंवासुदेवंशरणंप्रपद्ये॥७६॥उत्तिष्ठतस्तस्यज
लोरुकुक्षेमहावराहस्यमहींविदार्य॥विधुन्वतोवेदमयंश १८
रीरंलोकांतरस्थंमुनयोवदंति॥७७॥योगेश्वरंचारुविचित्र
मौलीज्ञेयंसमस्तप्रकृतेःपरस्तं॥क्षेत्रज्ञमात्मप्रभवंवरेण्यं
तंवासुदेवंशरणंप्रपद्ये॥७८॥कार्यक्रियाकारणमप्रमेयंहिर

(10A)

ण्यबाहुंवरपद्मनाभं॥महाबलंवेदनिधिंसुरोत्तमंतंवासुदे
वंशरणंप्रपद्ये॥ ३९॥ किरीटकेयूरमहार्हनिष्कैर्मण्युत्तमालं
कृतसर्गपात्रं॥पीतांबरंकांचनभक्तिचित्रंमालाधरंकेशा
वमभ्युपैमि॥ ४०॥ भवोद्भवंवेदविदांवरिष्ठंयोगात्मकंसांख्य
विदांगरिष्ठं॥आदित्यचंद्राग्निवसुप्रभावंप्रभुंप्रपद्येच्युत
मात्मवंतं॥ ४१॥यदक्षरंब्रह्मवदंतिसर्वगंनिशाम्यमृत्योर्हि
मुखात्प्रमुच्यते॥तमीश्वरंयुक्तमनुत्तमैर्गुणैः सनातनंलो

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10A)

ण्यबाहुं वरपद्मनाभं ॥ महाबलं वेदनिधिं सुरोत्तमं तं वासुदे
वं शरणं प्रपद्ये ॥ ८९ ॥ किरीटकेयूरमहार्हनिष्कैर्मण्युत्तमाल
ंकृतसर्वगात्रं ॥ पीतांबरं कांचनभक्तिचित्रं मालाधरं केशा
वमभ्युपैमि ॥ ९० ॥ भवोद्भवं वेदविदांवरिष्ठं योगात्मकं सांख्य
विदांवरिष्ठं ॥ आदित्यचंद्राग्निवसुप्रभावं प्रभुं प्रपद्ये च्युत
मात्मवंतं ॥ ९१ ॥ यदक्षरं ब्रह्म वदंति सर्वगं निशाम्य मृत्योर्हि
मुखात्प्रमुच्यते ॥ तमीश्वरं युक्तमनुत्तमैर्गुणैः सनातनं लो

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com